## ॐ श्रीपरमात्मने नमः। अथ पञ्चमोऽध्यायः॥ कर्मसन्न्यासयोगः।

| | |
|---|---|
| अर्जुन उवाच।<br>सन्न्यासं कर्मणां कृष्ण पुनर्योगं च शंससि।<br>यच्छ्रेय एतयोरेकम् तन्मे ब्रूहि सुनिश्चितम्॥१॥ | कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि।<br>योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये॥११॥ |
| श्रीभगवानुवाच।<br>सन्न्यासः कर्मयोगश्च निःश्रेयसकरावुभौ।<br>तयोस्तु कर्मसन्न्यासात् कर्मयोगो विशिष्यते॥२॥ | युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।<br>अयुक्तः कामकारेण फले सक्तो निबध्यते॥१२॥ |
| ज्ञेयः स नित्यसन्न्यासी यो न द्वेष्टि न काङ्क्षति।<br>निर्द्वन्द्वो हि महाबाहो सुखं बन्धात्प्रमुच्यते॥३॥ | सर्वकर्माणि मनसा सन्न्यस्यास्ते सुखं वशी।<br>नवद्वारे पुरे देही नैव कुर्वन्न कारयन्॥१३॥ |
| साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः।<br>एकमप्यास्थितः सम्यक् उभयोर्विन्दते फलम्॥४॥ | न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः।<br>न कर्मफलसंयोगम् स्वभावस्तु प्रवर्तते॥१४॥ |
| यत्साङ्ख्यैः प्राप्यते स्थानम् तद्योगैरपि गम्यते।<br>एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति॥५॥ | नादत्ते कस्यचित्पापम् न चैव सुकृतं विभुः।<br>अज्ञानेनावृतं ज्ञानम् तेन मुह्यन्ति जन्तवः॥१५॥ |
| सन्न्यासस्तु महाबाहो दुःखमाप्तुमयोगतः।<br>योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति॥६॥ | ज्ञानेन तु तदज्ञानम् येषां नाशितमात्मनः।<br>तेषामादित्यवज्ज्ञानम् प्रकाशयति तत्परम्॥१६॥ |
| योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः।<br>सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते॥७॥ | तद्बुद्धयस्तदात्मानः तन्निष्ठास्तत्परायणाः।<br>गच्छन्त्यपुनरावृत्तिम् ज्ञाननिर्धूतकल्मषाः॥१७॥ |
| नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित्।<br>पश्यञ्शृण्वन्स्पृशञ्जिघ्रन् अश्नन्गच्छन्स्वपञ्श्वसन्॥८॥ | विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि।<br>शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥१८॥ |
| प्रलपन्विसृजन्गृह्णन् उन्मिषन्निमिषन्नपि।<br>इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन्॥९॥ | इहैव तैर्जितः सर्गः येषां साम्ये स्थितं मनः।<br>निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः॥१९॥ |
| ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।<br>लिप्यते न स पापेन पद्मपत्रमिवाम्भसा॥१०॥ | न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम्।<br>स्थिरबुद्धिरसम्मूढः ब्रह्मविद्ब्रह्मणि स्थितः॥२०॥ |

| | |
|---|---|
| बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम्।<br>स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते॥२१॥ | कामक्रोधवियुक्तानाम् यतीनां यतचेतसाम्।<br>अभितो ब्रह्मनिर्वाणम् वर्तते विदितात्मनाम्॥२६॥ |
| ये हि संस्पर्शजा भोगाः दुःखयोनय एव ते।<br>आद्यन्तवन्तः कौन्तेय न तेषु रमते बुधः॥२२॥ | स्पर्शान्कृत्वा बहिर्बाह्यान् चक्षुश्चैवान्तरे भ्रुवोः।<br>प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ॥२७॥ |
| शक्नोतीहैव यः सोढुम् प्राक्शरीरविमोक्षणात्।<br>कामक्रोधोद्भवं वेगम् स युक्तः स सुखी नरः॥२३॥ | यतेन्द्रियमनोबुद्धिः मुनिर्मोक्षपरायणः।<br>विगतेच्छाभयक्रोधः यः सदा मुक्त एव सः॥२८॥ |
| योऽन्तःसुखोऽन्तरारामः तथान्तर्ज्योतिरेव यः।<br>स योगी ब्रह्मनिर्वाणम् ब्रह्मभूतोऽधिगच्छति॥२४॥ | भोक्तारं यज्ञतपसाम् सर्वलोकमहेश्वरम्।<br>सुहृदं सर्वभूतानाम् ज्ञात्वा मां शान्तिमृच्छति॥२९॥ |
| लभन्ते ब्रह्मनिर्वाणम् ऋषयः क्षीणकल्मषाः।<br>छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः॥२५॥ | |

ॐ तत्सत् इति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे
कर्मसन्न्यासयोगो नाम पञ्चमोऽध्यायः॥

**श्रीकृष्णार्पणमस्तु ॥**